
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

स प्रसङ्गउपोद्घात हेतुतावसरस्तथा। निर्वाहकैककार्यत्वे षोढा सङ्गतिरिष्यते॥१॥

Accession No:- M915
Title:- मणि दिधितीसार
Subject:- न्याय
Author:- भवानन्द कृत
पत्र:- ९५ अपूर्ण

(२)

भ०

केवलस्येत्यर्थः । विचित्रसहकारिरहि-
तस्येति यावत् २

ॐ श्रीगणेशाय नमः ॥ नमस्कृत्य गुरून् सारं निष्कृष्य मणिदीधितेः ॥ श्री [illegible] भवानन्दसिद्धान्तवागीशेन प्रकाश्यते ॥१॥
ॐ नमः इति । परमात्मने सर्वोत्कृष्टात्मने नमः । उत्कर्षश्च जगतः सृष्टिस्थितिप्रलयकर्तृत्वम् । एकरूपस्य कथं सृष्ट्यादिविचित्रकार्यका-
रित्वं तत्र हेतुमाह । ॐ इति । अखिलविद्भिः शिवात्मक इत्यर्थः । ॐकारघटकैरकारोकारमकारैर्ब्रह्मादीनां प्रतिपादनात् । तस्य च नमस्का-
र्यताप्रयोजकं रूपान्तरं दर्शयति । सर्वेति । सर्वभूतानि सर्वप्राणिनः विष्टभ्यान्तर्यामितया स्वस्वकार्ये नियोज्य परितिष्ठते । अन्तर्यामिणो
भगवतः प्रेरणयैव सर्वप्राणिनां स्वस्वकार्ये प्रवृत्तिरिति भावः । विष्टम्भश्च धारणानुकूलः संयोगविशेषः । भूतपदं मूर्तपरम् । अन्तर-
य विश्वव्यापी विश्वशक्तिः पिनाकी इत्यत्र विश्वशब्दो यावन्मूर्तवचन इत्याचार्याः । अपि च ईश्वरसंयोगस्यैव ब्रह्माण्डादिपतन-
प्रतिबन्धकत्वात् । अत एव द्यावापृथिवी विधृते तिष्ठतः इति श्रुतिरपि भगवत्संयोगस्य धारणत्वमाहेत्यपि वदन्ति । यत्तु आका-
शान्नेश्वरादतिरिच्यत इति मतानुसारेणेदमिति । तन्न । ईश्वरस्येवाकाशस्यापि भूतपदवाच्यत्वेन तत्रैव तत्प्रतियोगिकसंयो-
गाभावात् । अखण्डो नित्यो आनन्दबोधो यस्य तस्मै इत्यर्थः । नित्यं विज्ञानमानन्दं ब्रह्मेति श्रुतिरन्तरपि ब्रह्मस्वरूपावधा-
रणपरा । आनन्दविशिष्टस्य नित्यत्वं प्रतिपादयन्ती विशेषणस्यानन्दस्यापि नित्यत्वं प्रतिपादयति । तथा च श्रुतिबलात् सिद्ध-
नित्यसुखे सुखत्वाजातिरेव पुण्यजन्यतावच्छेदकं कल्प्यत इत्याशयः । अखण्डो दुःखासंभिन्न आनन्दो यस्मादेवं भूत उपास-
ना समक्षः बोधो यस्येत्यर्थः । यस्येति इष्टयो विषयता · दृग्यया अप्रतिहते क्षाय । ननु संगतिप्रदर्शनानुमाननिरूपणप्रतिज्ञा

कल्वेन २ स्वनिष्ठसुखदुःखाभावगोचरे इच्छाया इत्यर्थः ।

विभुनिष्ठसंयोगबोधकपदसम-
भिव्याहृतपदेन विभोरसंग्राह्य-
त्वादेव ५

श्रीरामाय नमः

१

योऽप्रयोजकाभावः सङ्गताभिधानस्यैवोन्मत्तप्रलपितत्वादिशङ्कानिरासप्रयोजकत्वादत आह॰ पूर्वापरेति॰ सङ्गतिप्रदर्श
नस्य फलमेकवाक्यताप्रतिपत्तिः॰ अनुमाननिरूपणप्रतिज्ञा पाकसंशिष्या रणं सावधानत्वमित्यर्थः। यत्प्रयोजनवत्त्वामव
गम्य पूर्वग्रन्थे प्रवृत्तानां तदेकवाक्यताज्ञानेनैवोत्तरग्रन्थेपि तत्प्रयोजनवत्ताज्ञानेन प्रवृत्तिसंभवादिति भावः। तत्र गौर्थ
त्यादेकैकवाक्यसाकाङ्क्षत्वं चेद्विभागेस्यादिति जेमिनिसूत्रम्॰ अत्रार्थैक्यादेतावन्मात्रे भग्नोवाविभजत्तु पृथावोविभजत्तुइत्य
नयोर्विभागरूपार्थैक्यादिति व्याप्तिः अतः साकाङ्क्षेति॰ विभागे विच्छिद्यपाठे श्रोतुर्यदि परस्परार्थान्वयविषयिण्याका
ङ्क्षा भवति यथा घटमानयेत्यत्र घटमित्युक्ते आनय पश्य वेत्याकाङ्क्षा। एवमानयेत्येतावदुक्ते घटं पटं वेति श्रोतुरा
काङ्क्षा भग्नोवाविभजत्तुरस्यविच्छिद्यपाठे नैवमाकाङ्क्षेति तद्व्युदासः। तावन्मात्रे चस्योनत्तोसदनेरूपणे प्रिय
तस्यधारपासुशेवं कल्पयामितस्मिन्सीदामृते प्रतितिष्ठ ब्रीहीणां मेध सुमनस्यमानः इत्यत्र कल्पयामी सन्त्रः सद
नार्थको मन्त्रः। तस्मिन्सीदेत्यादिपरः सादनार्थक एतयोश्च विभागे साकाङ्क्षत्वमस्ति कल्पयामीत्यत्र तस्य विच्छेदे तस्मि
न् कस्मिन्निति साकाङ्क्षा भवति॰ अतोर्थैक्यादिति॰ तत्र सदनसादनयोरर्थयोर्भेदादिति भावः। अर्थैक्यं च नवाक्या
र्थैक्यं प्रतिपन्नं रणं वाक्यार्थानां भेदात् किं तु तात्पर्यविषयैक्यं प्रकृते च प्रमाणतत्वविवेचनमेव चतुर्णां ग्रन्थानां
तात्पर्यविषयः करणकथनानंतरं कार्यस्य कथने किमस्य कार्यमिति साकाङ्क्षा चेति॰ न च विभिन्नतात्पर्यकेष्वपि प्रस

त्यक्षादिचतुष्टयधर्मिकप्रमाणत्वप्रभेदपरिच्छेद एवेत्यर्थः २

सि.टी.भू.

यद्यदुपजीवकं तत्तन्निरूपणानंतरं निरूप्यमिति व्याप्तौ व्यभिचाराभाव माहेत्यर्थः २ निरूपणक्रमनियामकत्वेन फलयोः स्वरूपयोश्च संगतेराकांक्षितत्वादेव ५

संगतिः १ भि २ प्रमितिप्रमाणयोरेव ४ त ५

त्यादिसत्वान्न सङ्गतिरीदृशेकवाक्यतार्थं प्रतिरूपंतये कवाक्यताप्रतिपत्तिरिति वाच्यम्॰ एकवाक्यताप्रतिपन्नयोरेव सङ्गतिव्यवहारेण संगतिलक्षणेपि एकवाक्यताया अनुप्रवेशात् भिन्नतात्पर्यकेसङ्गत्यभावादिति। अकारान्तप्रत्यक्षपदस्य सत्वात् प्रत्यक्षेतिपाठनिर्देशोनुचित इत्याशयेनाह॰ प्रत्यक्षावितीति। प्रत्यक्षप्रमित्यनंतरं अनुमितिनिरूपणे प्रत्यक्षप्रमाणनंतरंचानुमाननिरूपणे सङ्गतेराकांक्षितत्वादुभयत्रैवतत्प्रदर्शनपरत्वं मूलस्याह॰ अत्रोपजीव्योपजीवकभावइति। अत्रप्रत्यक्षानुमानयोः अत एव फलयोरेवादौ निरूपणात् फलेइति प्रथमेनुपयुक्तम्। केचित्तु स्वरूपयोः फलयोश्च कार्यकारणभावोपि स्वरूपयोः सङ्गतिः जिज्ञासोपयोगित्वादित्याहुः। उपजीवकत्वेसंगतिः सा चानंतराभिधानव्याप्या अत एवोपजीवकत्वादनंतरं निरूप्यत इत्युक्तमिति प्राचांमतमनुसृत्याह॰ प्रत्यक्षफलस्येति। अनुमित्यनुव्यवसायादेरित्यादिना अनुमित्यात्मकविशेष्यतावच्छेदकप्रकारकधर्मिस्तकविशिष्टवैशिष्ट्यप्रत्यक्षग्रहणम्॰ नसर्वेति। अयेथ इति प्रत्यक्षेव्यभिचारादित्यर्थः। तथा अनुमित्युपजीविकानुपत्तातीन्द्रियमेवपक्षादिपथापरमाणुः आकाशसंयोगी गुरुत्वादित्यादौ तत्र व्याप्तिज्ञानस्यापि अनुमितिरूपत्वात्तज्जन्यानुमितौ न प्रत्यक्षोपजीवकत्वमत आह॰ अनुमितयस्त्विति॰ तत्रापि पतान प्रत्यक्षस्य गुरुत्वानुमितिद्वाराउपजीव्यत्वादित्याह॰ परंपरयावेति॰ ननुयेलिंचिनैतौ ननिष्ठमुपजीवकत्वमपिसङ्गतिरेव

संगतेः अनंतराभिधानव्याप्तत्वोदेव ८ प्रत्यक्षत्वा स्वरूपयोः कार्यकारणभावः किं प्रत्यक्षकार्यमितिजिज्ञासायामुपयु क्तः। फलयोः कार्यकारणभावस्तु किं प्रत्यक्षफलोपजीवकप मितिजिज्ञासायामुपयुक्त इतिभावः॰

अस्वरसवीजं फलयोः कार्यकारणभावस्याप्युक्तरीत्या साक्षादेवोपयोगस्यं भवेपरंपरयोपयोगवर्णनानौचित्यमेव ७

श्रीरामायनमः

ज्ञानसाध्यापार्गहाविष्टसाधनता॥

कं१३ ना

तया चाविनिगमे रस्यत आह· पुरस्कृतत्वेति अनंतराभिधानप्रयोजकतया मुनिना आदृत इत्यर्थः। अथमनुमितित्वरू
पप्रमितिविभाजकोपाध्यवच्छिन्ननिष्ठः उपजीवकतोत्कर्षः उपजीव्योपजीवकतापरंपरयाऽपजीवकत्वस्यापि संगति
त्वेप्रत्यक्षफलत्वावच्छेदेनापि तदस्ति साशंकते यद्यपीति। अदृष्टजननीम्· अदृष्टप्रयोजकताम्· कार्यमात्रं प्रति
अदृष्टहेतुः अदृष्टं च पापादि प्रवृत्त्यधीनं प्रवृत्तिश्चेष्टसाधनताज्ञाने च वेदात्· तत्र च शक्तिग्रहः कारणं तच्च वेदप
दं अत्र शक्तेरवसंतरे विनार्हेत्यप्रयुज्यमानत्वात् इत्यनुमितिरूपमिति शब्दानुमितेः प्रत्यक्षप्रसंप्रयोज
कत्वम्· समयः शक्तिः। शक्तिग्रहापेक्षया अव्यवधानेनोपजीव्यामनुमितिं दर्शयति· मत्वे नियतेति·पा
णमत्कृतिसाध्यः मत्कृतिं विना असत्त्वे सति मदिष्टसाधनत्वादित्येवंरूपेत्यर्थः। आदिनामदिष्टसाधनता
नुमितिसंगतिः रहः। न त्वनुमितेरनुमितित्वरूपप्रमितिविभाजकोपाध्यवच्छेदेन प्रत्यक्षोपजीवकतानुप्रत्य
क्षप्रमितित्वावच्छेदेनानुमितेरुपजीवकत्वं ईश्वरप्रत्यक्षे अभावादत आह· ईश्वरप्रत्यक्षेति· तथा च फलयोर्नि
रूपणे फलतावच्छेदकावच्छेदेन उपजीवकत्वमेव पुरस्कर्तुमुचितम्· तत्र प्रकृतेऽस्त्येवेत्यर्थः। न च निरूप्यतावच्छे
दकावच्छेदेनोपजीवकत्वमेव पुरस्कर्तुमुचितं निरूप्यतावच्छेदकं तु प्रत्यक्षत्वमीश्वरप्रत्यक्षसाधारणमिति
वाच्यम्· इन्द्रियार्थसन्निकर्षोत्पन्नमित्यादिना निरूपित[illegible] प्रत्यक्षत्वस्य ईश्वरप्रत्यक्षासाधारण्यादिति· इद

ल२

5

शि. टी. अ.　　　　　　　　　　रा० ७　　　　　　कार्यमात्रजनकादृष्टस्योपादानप्रत्यक्षजनकतयाऽन्यादिप्रत्यक्षधीमेवत्यादितिभावः। ४

द्वारकम्। दृष्ट[illegible]द्वारकम्। अदृष्टाद्वारकमितियावत्। तेनादृष्टद्वारकस्यापि दृष्टप्रत्यक्षादिद्वारकत्वे पि न क्षतिः। इह। अ
नुमितौ। तथात्वम्। उपजीवकत्वम्। इतरस्या। दृष्टद्वारकोपजीवकत्वस्य अविनिगम्यत्वात्। विनिगमनाया अविषयत्वात्।
एकतरपक्षपातिनी युक्तिर्हि विनिगमना। अदृष्टद्वारकोपजीवकत्वस्य चोभयसाधारणत्वात्। नेतरमात्रनिष्ठं संप्रत्य
क्षफले अदृष्टद्वारकानुमित्युपजीवकत्ववत्। अनुमानफलेप्यदृष्टद्वारकोपादानप्रत्यक्षोपजीवकत्वस्य [illegible] सं
[illegible] त्वादित्यर्थः। स्वरूपतः उपजीवकतो विरहेणेति। सर्वं चेति। इन्द्रियापेक्षेति। अनुमित्यात्मकव्याप्तिज्ञानेपि प
यध रंपरयेन्द्रियस्यापेक्षणीयत्वमस्त्येवेतिभावः। वस्तुतस्तु सर्वं च मनोलक्षणेन्द्रियजन्यत्वमस्त्येवेतिभावः। ननु व्या
प्तिज्ञानत्वेनैवानुमितिकरणत्वं तथा च परमते ईश्वरीयव्याप्तिज्ञानेन नकिंचिदपेक्षो सिद्धिकमत आह। अनुमितीमिति।
अनुमितिं भावयतः। उपादानप्रत्यक्षाविषयोत्पादयतः। न लोकरणेतेति। अनुमितिफलोपहितकरणतानिर्वाहकप्र
त्यासत्तिश्च विशेषणज्ञानेन स्वजन्यपरामर्शः सर्वत्र करणस्य व्यापारसंबंधेन फलोपधायकत्वात् विशेष
णज्ञानत्वेन जनतीयो च सामानाधिकरण्यप्रत्यासत्तिः अत ईश्वरीयव्याप्तिज्ञानं नास्मदादिपरामर्शसंबंधेन फ
लोपहितं तथा च मादृशस्वजन्यपरामर्शोत्पत्तिप्रत्यासत्तिविरहेण ईश्वरज्ञानस्यानतत्वात् अनुमितिकरणताशून्यत्वा
दनितस्य स्वरूपयोग्यत्वे फलावश्यंभावापत्तेः जन्यव्याप्तिज्ञानत्वेनैवानुमितिकरणतावाच्येत्याशयः। एतेनाप्रत्यास
न्नस्यैव्यपरस्य स्वदण्डादेः करणत्वात् प्रत्यासत्त्यभावेन कारणत्वाभावसाधक इति प्रयुक्तम्। सामान्यतो नभिधानात्। श्रीरामाय नमः
　　　२

कृ ४　　　　　　　　　　　　　　　　　　　　　　　　　　　नद्यपाठेननर

पत्तु ईश्वरीयव्याप्तिज्ञानमपि स्वजन्यव्यापारसम्बन्धेनानुमितिफलोपहितं भवत्येव कार्यमात्रोपधायकस्य तस्य फ
लानुकूलव्यापारात्मकपरामर्शप्रतिउपधायकत्वादिति । तन्न । एवं सति व्यधिकरणव्याप्तिज्ञानस्य कालोपाधिवि
धयापरामर्शोपधायकत्वेन स्वव्यधिकरणानुमितिफलोपहितकरणत्वप्रसङ्गेन विशेषणज्ञानत्वेन स्वज
न्यपरामर्शस्येव तस्य स्वासत्तिरपाईश्वरीयव्याप्तिज्ञानस्यानुमितिफलोपहितकरणत्वस्यासंभवात् ।

विषयितासंबंधेन ५

न चैवं न केनापि संबन्धेन फलोपहितत्वे निरस्येतिव्याप्तेरवाधएवेति वाच्यम् । स्वरूपयोग्यताघटक
संबन्धेन फलोपधानस्यैव व्याप्तौ निवेशात् । अन्यथा कपालादेर्द्रव्यत्वेनरूपेण घटजनकत्वेप्याकाशादेः
संयोगादिसंबंधेन घटघटात्मकफलसंबंधसंभवात् । एतद्व्यानुपादानस्यैव निष्प्रयोजनकत्वापा
तात् । फलायोगव्यवच्छिन्नं कारणं करणं तादृशमनुमितिकरणं च परामर्शः । तस्य करणता
यां वैप्रत्यासत्तिः फलोपहितकरणमेवाभिरूप्यम् । अतएव वक्ष्यति फलोपहितस्यैव लक्ष्य
त्वमेवेति । तथा चईश्वरज्ञानस्य फलसामानाधिकरण्यविरहेण तादृशफलोपहितकरणत्वा
भावादित्यर्थः । इति कश्चित् । अनुमितिकरणत्वावच्छेदेन प्रत्यक्षोपजीवकत्वं व्यवस्थाप्य प्र
त्यक्षकरणत्वावच्छेदेनानुमानोपजीवकत्वस्य व्यतिरेकमाह । सर्वं पुनरिति । ननु व्याप्तिज्ञानत्वे

नैवानुमितिकरणत्वम् । अनित्य इव नित्येऽपि अदृष्टादिरूपसहकारिविरहेण फलव्यतिरेकसंभवात् । नित्यस्येति व्याप्तेरप्रयोजकत्वा
दत आह । दृष्टद्वारेति । तथा च करणतावच्छेदकधर्मसामानाधिकरण्येन स्वजनकादृष्टाजनकेन्द्रियजन्यत्वमेवानुमाने आनं
तर्याभिधाननियामकमिति भावः । इन्द्रियत्वसामानाधिकरण्येन स्व[illegible]जनकादृष्टाजनकानुमानजन्यत्वं नास्तीत्यत आह ।
न चोत्पत्तिमदपीति । अपिना करणतावच्छेदकावच्छेदेनेति सूचितम् । न च यत्र चक्षुर्घर्षणेन पूर्वचक्षुर्नाशानंतरं
चक्षुरंतरोत्पादः तत्र घर्षणजनक[illegible]प्रतिज्ञानस्य दृष्टद्वारकस्य कृतिसाध्यतानुमानस्योपजीवकमे
व चक्षुरंतरं एवमौषधपानानंतरं प्रकृष्टचक्षुरुत्पादेपीति वाच्यम् । तत्र घर्षणजनकानुमानस्य औषधपान
जनकानुमानस्य च प्रयोजकत्वेन जनकत्वाभावादिति । न चैवमदृष्टद्वारकं व्यर्थम् । अदृष्टद्वारकानुमान
स्येन्द्रियाजनकत्वादिति वाच्यम् । ईश्वरज्ञानस्याप्येतत्कस्यानुमितिकरणतया तद्वारणायैव तदुपादानादि
ति । अदृष्टद्वारकोपजीवकत्वस्योभयत्रापि सत्वान्न विनिगमकत्वमिति भावः । न नियमइति । तथा चोपजी
वकत्वादिति हेतुपंचम्यनुपपन्नेति भावः । उचितक्रमार्थं निरूपयतीति । यथा त्वे वानुमिति[illegible]णानंतरं त
त्करणनिरूपणमिति भावः । तद्व्याने मन्यजिज्ञासाप्रयोज्यत्वं पंचम्यर्थो न तु ज्ञानज्ञाप्यत्वमित्याशये
नाह । किंचातइति । तादृशनियमाभावे किमनिष्टमित्यर्थः । ननु अनंतराभिधानेऽव्याप्यत्वे नास्य स
ङ्गतित्वमनुपपन्नं अनंतराभिधानव्याप्यत्वस्यैव तद्घटकत्वादत आह । नहीति । सङ्गतिलक्षणघटी

श्रीरामाय नमः

निरूप ४

तोचने नूनस्यानंतराभिधानाव्याप्यत्वं दर्शयितुं तल्लक्षणमाह। आनंतर्येति। आनंतर्याभिधानप्रयोजिका या जिज्ञासा
तज्जनकप्रश्नज्ञानं तद्विषयइत्यर्थः। जिज्ञासाजनकज्ञानविषयप्रश्नादावतिव्याप्तिवारणाय प्रयोजकांतम्। प्रत्यक्ष
स्य कारणताज्ञाने कारणस्य कार्यभावश्यकत्वमिति क्रमेण कार्यस्वरूपेण कार्यसामान्यज्ञानं ततः सामान्यधर्म
प्रकारकज्ञानस्य विशेषधर्मप्रकारकजिज्ञासाजनकत्वात् किमस्य कार्यमित्याकारिका शिष्यजिज्ञासा ततः
शिष्यस्य किमस्य कार्यमिति शब्दप्रयोगः ततः शिष्यजिज्ञासाज्ञाने गुरोरुक्तत इष्टसाधनताज्ञाने नानंतराभिधा
नामतिक्रमेण जिज्ञासायो अनंतराभिधानप्रयोजकत्वम्। न च ज्ञानगोचरेच्छा जिज्ञासा तत्र च ज्ञाने इष्टसाधन
ताज्ञानं हेतुरिति तद्विषये इष्टसाधनत्वेति व्याप्तिरिति वाच्यम्। तादृशजिज्ञासाप्रतिसमानविशेष्यकत्वप्रत्या
सत्त्यनवच्छिन्नाया जनकतातदवच्छेदकप्रकारकज्ञानत्वं तेन तस्योक्तत्वात्। इष्टसाधनताज्ञानस्य हेतुतायां स
मानविशेष्यकत्वं प्रत्यासत्तिः ननु कार्यत्वप्रकारकज्ञानत्वेन कार्यतावांतरधर्मप्रकारकजिज्ञासात्वावच्छिन्ने प्रतिहे
तुतायां कार्यत्वेन वस्तुग्रस्याघटज्ञानेपि कार्यतावांतरधर्मप्रकारकज्ञानस्य एवेच्छोदयात् अवच्छेदकत्वं च तस्य पर्याप्त्य
धिकरणत्वं तेन कार्यत्वघटैकैकदेशनिरासः एतल्लाभाय चार्थपदम्। पत्प्रकारके सन्निधानाज्ञानकार्यपदोध
मिति अतिव्याप्तिरिति। प्रयुक्तादृशजिज्ञासात्वव्याप्यधर्माऽवच्छिन्नकार्यताप्रतियोगिककारणतायां पत्प्रका

व्याप्यभावनिरासः २

शिष्यीयप्रश्न... साधनताज्ञानेन ... इति ... ५

अवच्छेदकतापर्याप्त्यधिकरणत्वम् ३

श्री... [illegible]

रकज्ञानत्वं अवच्छेदकं तत्त्वमित्यर्थः। उपायेच्छात्वावच्छिन्नं प्रत्येव इष्टसाधनताज्ञानस्य हेतुत्वादुपायेच्छात्वस्य
घटेच्छादिसाधारणेन तादृशजिज्ञासात्वे व्याप्यत्वाभावात्। तन्न। कार्यत्वावान्तरधर्मप्रकारकजिज्ञासात्वादी
नां आनन्तर्याभिधानप्रयोजकजिज्ञासात्वाव्याप्यत्वात्। तादृशकार्यकारणभावकल्पनाप्रकृते लक्षणागम
नासंभवात्। तथा च ज्ञि(?)त्वावच्छिन्नकार्यताप्रतियोगिककारणतायां च तथा ज्ञि(?)त्वस्यैवावच्छेदकतया कार्यत्वप्र
कारकज्ञानत्वस्यानवच्छेदकत्वात्। पक्षेष्टसाधनत्वे कार्यकारणभावकल्पनया संगतिरेवेति तत्रातिव्या
प्तिर्न दोषायेति तन्तुच्छम्(?)। प्रत्यक्षानुमानयोः कार्यकारणभावो हि तयोः सङ्गतिः न त्विष्टसाधनत्वम्।
तथा च पदेनन्तरं पदाभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयो यः स तयोः सङ्गतिरित्येवं रूपेण
प्रत्यक्षानुमानसङ्गतिलक्षणे इष्टसाधनत्वेऽतिव्याप्तेरपरिहारात्। यद्धर्मव्याप्यधर्मप्रकारकज्ञाने
ष्टसाधनताज्ञानमानन्तर्याभिधानप्रयोजकजिज्ञासाजनकं स धर्मः सङ्गतिः। अत एव सामान्य
धर्मप्रकारकज्ञानस्य स्वातन्त्र्येण(?) विशेषधर्मप्रकारकजिज्ञासां प्रति जनकत्वाभावेपि न क्षतिः। न वाऽ
व्यसाधनत्वेऽतिव्याप्तिरिति केचित्। अन्ये वदन्ति। [illegible] अभिधानानन्तरं घटत्वसामान्यज्ञानाद्
[illegible] इति जिज्ञासायां [illegible] अभिधानप्रयोजकजिज्ञासाजनकज्ञानविषये
धर्मत्वेऽतिव्याप्तिः एवमाधारत्वज्ञानानन्तरं माधेयत्वसामान्यज्ञानात् किमस्याधेयमिति जिज्ञासायां

श्रीरामायनमः

चिंतायंदंडदं जिज्ञासोर्भावे स्मित्यन्येन चिंतनीयपरम् २ द्वितीयपक्षे नोपस्थापकं विना १ चि३

विनैतिनदुपस्थापकं ५ घटकत्वावच्छेदकधर्मवत्वम् ३

आधेयस्यानंतराभिधानादाधेयत्वादायपीति । अत्र स्मृते हेतुघटोस्तीत्यादौ घटत्वादिकं संगतिरेव उपोद्घातमध्ये निवेशात् । तथाहि । चिंतां प्रकृतसिध्यर्थामुपोद्घातं विदुर्बुधाः इत्यनेन प्रकृतसिध्यनुकूलचिंताजनकत्वाद्धि न्नप्रकृतानुकूलत्वमुपोद्घातः । प्रकृतं चात्र तत्र विशिष्टोपादेयम् । अनुकूलत्वं च कृतधीघटकत्वं चिंतनीयप्रकारत्वमित्यादिक्रमेणावबोध्यम् । घटकत्वं यथा । व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमित्यत्र आद्यव्याप्तेरुपस्य व्याप्तिपदवाच्यत्वेन ज्ञाने का व्याप्तिरित्याकारिकायां जिज्ञासायां व्याप्तिनिरूपणम् । एवं द्विपास्मन्निरुद्धे पर्वतीयपक्षे व्याप्तिविशिष्टत्वधीर्ननु दुपस्थापकत्वं किमित्याकांक्षायां सामान्यलक्षणनिरूपणम् । एवं विशिष्टज्ञानस्यानुमितिहेतुत्वे किं तत्पकमित्याकांक्षायां परामर्शस्यानुमितिहेतुत्वव्यवस्थापनमिति तत्रोपोद्घातपदप्रयोगः । प्रकृते ज्ञातघटपदार्थस्य घटोस्तीत्यतो घटपदवाच्यत्वेन ज्ञाने को घटपदवाच्य इति जिज्ञासायां कंबुग्रीवादिमान् घट इत्यादिक्रमेण निरूपणे प्रकृतघटास्तित्वसिध्यनुकूलचिंताजनकस्य घटास्तित्वस्य घटे [illegible]तेनोपोद्घातत्वसंभवात् । एवमाधेयत्वादिकमपि प्रसंगमध्ये निवेशयते । आधारप्रसंगेनस्मृतस्याधेयस्यानुपेक्षणीयत्वज्ञानेन जि

अत्र प्रकृतं व्याप्तिपदवाच्यास्तित्वं ४

ज्ञापकत्वं ज्ञानसंपादकत्वं तत्वेन किंचिद्घटकोपस्थापकत्वेन्या प्तिविशिष्टप्रमाणसहकारित्वप्रा माण्यमाह । एवं सिद्धिप्रेति द्वितीयमाह । एवं विशिष्टेति ५

न३४

अनुमितिहेतुत्वसाधकप्रमाणसहकारितावादिनेकं निरूपणमित्यर्थः ४

घटकत्वं [illegible] त्वे २

शि॰ टी॰ म॰

१

शिष्ये॰ ए॰ ४

उपेक्षा लीयाला चतुरो दिसादिः ४

श्रोतुरेवस्मृतिः अनुपेक्षातौ च कुरित्यपि पाठः ५

उपेक्षानर्हत्वावच्छेदकधर्मवत्वेनेव २

ता सोदयात्. के चितु घटोत्रीत्यादौ घटपदवाच्यत्वं आपेयत्वादिके यत्र सङ्गः एव. अनुपेक्षणीयत्वं हि उपेक्षानर्हता
वच्छेदकधर्मवत्वम्. स च धर्मो घटपदवाच्यत्वाप्येयत्वादिः। निरुक्तरूपेणैवानुगमनान्नापि व्यभिचारः॥ तत्रस्मृ
तिकालावच्छेदेनोपेक्षानर्हत्वं प्रसङ्गः॥ अत्र स्मृतिकालावच्छेदः स्वरूपसम्बन्धतरांशः ज्ञातोपयोगी. स्मृतिरनुपे
क्षणीयता नाभिधातुरेव. स्वयं स्मृतायां जिज्ञासानुदयात्स्वीयानुपेक्षणीयत्वं तानस्य जिज्ञासाजनकत्वा
भावात्. केचितु. श्रोतुरेव स्मृतिरनुपेक्षणीयता च. अस्मिन्नष्टे यत्किञ्चिदुपेक्षानर्हत्वव्यतीतिसंभवः श्रो
तुर्जिज्ञासोदयादित्याहुः॥ एवं प्रकृतसिध्यनुकूलचिन्ताकालावच्छेदेन प्रकृतानुकूलत्व [illegible] ततः चिंता
चवर्तुर्मीला. अत्रापि तादृशकालावच्छेदः स्वरूपसम्बन्धोपेक्षातपदनियामकइतरांशः ज्ञातोपयोगी. एवं
प्रतिबन्धकीभूता शिष्यजिज्ञासानिवर्तकोऽवश्यवक्तव्यत्वमवसरः॥ अत्रापि निवर्त्यांशः स्वरूपसम्बन्धा
न्तरांश एव ज्ञातोपयोगी. यथा अनुमाननिरूपणानन्तरं तादृशजिज्ञासानिवर्तकोऽवश्यवक्तव्यत्वं ज्ञाता
रोकिं वक्तव्यत्वमिति श्रोतुर्जिज्ञासानन्तरं उपमाननिरूपणमिति. जिज्ञासितार्थस्याभिधानत्वमवसर
इति भ्रमितव्. तस्यापि पूर्वोक्तस्य पर्यवसानम्. भवति हि जिज्ञासाविषयासिद्धत्वे इदं ज्ञातं अन्यथा किं
वक्तव्यमिति जिज्ञासेति. निर्वाहकत्वं एककार्यनिर्वाहकत्वम्. तच्च प्रयोजकत्वम्. कारणत्वं इव

श्री रामाय नमः

६

स्य३

छेदकसाधारणम्। यथा व्याप्तिपक्षधर्मतयोरनुमितिजनकत्वेपि तज्ज्ञानजनकीभूतज्ञाने विषयतावच्छे-
दकत्वेन एककार्यानुकूलत्वम्। तत्र सामान्यतोनुमितिलक्षणैककार्यानुकूलत्वज्ञाने किं तदनुकूल-
मिति जिज्ञासायामनंतरं पक्षधर्मतानिरूपणमिति। एककार्यत्वं एककार्यतात्प्रयोज्यता सा च जन्य-
तान्यज्ञानविषयताय। यथा ईश्वरेशयोरनुमानाजन्यत्वेपि तज्जन्यज्ञानविषयत्वलक्षणैक-
कार्यत्वसङ्गत्या ईश्वरवादानंतरं मीमांसकेन शक्तिराशंकिता। नैयायिकेनेश्वरसिध्यनंतरं श-
क्तिं निरस्य परमप्रयोजनं त्वनुमानस्यापवर्ग इत्यनेनेश्वरसिध्यपवर्गयोरनुमानजन्यत्व-
लक्षणैककार्यत्वसङ्गतिः सूचिता। सामान्यतोनेककार्यत्वज्ञाने किमन्यत्कार्यमिति जिज्ञासा-
यां विशिष्य कार्यान्तराभिधाने तत्सामान्यलक्षणसंभवात्। यत्तु निर्वाहकत्वमुपपादकत्वमिति तन्न उपपादकत्वं ज्ञापकत्वं
घटकत्वं वा उपोद्घातेन गतार्थत्वात्। न कारणत्वं हेतुतया गतार्थत्वात्। एवं सर्वत्रोहनीयम्। अत्र च विभिन्नतोपयिके सङ्ग-
तिव्यवहाराभावादेकवाक्यतैयान्त्वं सामान्यलक्षणे विशेषलक्षणे च देयम्। अत्र च तादृशजिज्ञासास्वरूपयोग्य-
त्वस्यातिप्रसक्तौ फलतो प्रधानस्य च सर्वत्रासंभवात्। प्रसङ्गाद्यन्यतमत्वं तत्वमिति ध्येयम्। ज्ञायते चेति। कार्यज्ञाने का-
र्यं सकारणकमिति रीत्या कारणत्वस्य ज्ञानात् ~~[struck out]~~ ति रीत्या कार्यत्वस्य ज्ञानात् किमस्य जिज्ञासेत्यर्थः।१ कार्यमिति२

त्वात्२

किमस्य कारणमिति जिज्ञासा कारणे ज्ञाने कारणं सकार्यकमि१

अनुमानानंतरमुपमानस्याभिधाने किंनियामकमित्याकारकेसंगतिः ६ उपमानग्रंथे एव ३ बाधकं विनानियतत्वेन ५ संगतिबोधकावसराद्युपदर्शनेन ३

दपोरेवेति॰ तथा च सङ्गतेरनंतराभिधानव्याप्यत्वं सुतरामसंभवि ताद्दशवादिमते कारणत्वव्यभिचारादिति भावः।
इत्थं च॰ सङ्गतेरनंतराभिधानव्याप्यत्वे च॰ एवं चेऽपजीवकत्वादिति पंचमी न हेतुत्वापाकि चज्ञानजन्यजिज्ञासा
प्रयोज्यतायामिति भावः। साधवा [illegible] येति॰ यद्यपि उपमाने एव सङ्गतिप्रदर्शनं ताद्दशशब्देनैवाभिधानं तु शब्दपत्या न्येरु
द्दलावबम्॰ तथापि प्रकरणसाधवादित्यर्थः। प्रकरणे च सङ्गतिप्रदर्शनप्रयोजिका [illegible] प्र
त्यक्षानंतरं उपमानात्प्रागभिधाने किं नियामकमिति जिज्ञासाया औत्सर्गिकत्वेन तामनादृत्य उपमानग्रं
थेन तत्सङ्गतिप्रदर्शनं आकांक्षांतरकल्पनागौरवादिति भावः। ननु बहुवादिसंमतत्वेन संङ्गतिरत आह॰ सुप्र
सिद्धत्वेति॰ अनुमानस्य सुप्रसिद्धत्वेन सामान्यधर्मप्रकारकज्ञानस्य विशेषधर्मप्रकारकजिज्ञासाजनकस्य सं
भवादिति भावः। सुप्रतिपदतयेत्यत्र हेतुर्न रसनीयेति निरसनीयत्वस्य वादिविप्रतिपत्तिविषयत्वेनेत्यर्थः। दुरू
त्वेन॰ बलवदनिष्टसाधनत्वज्ञानात्कदाचिदिच्छाप्रतिबंधः स्यादतः सुबोधत्वं प्रथम जिज्ञासायांऽपयो जिदुरुत
त्वे हेतुर्निरसनीयबहुत्वादीति॰ ननु सुगमस्य स्वयमूहयितुं शक्यत्वादित्तन्यायेन सुगमप्रत्यये कथं दुरूहापर्युक्ते
द्वाः कस्यचित् जिज्ञासाभवत्येवेत्यत आह॰ औत्सर्गिकीमिति॰ ननु प्रतिबंधकीभूतायाः जिज्ञासाया निवृत्तिः प्र
तिबंधकाभावांतरवत्स्वरूपसतीहेतुः ननु तत्तोमानाभावादत आह॰ यथा चेति॰ आकरे॰ प्रमाणतत्त्वबोधादौ श्रीरामायनमः ६

तथा च अवसरे संगतिजिज्ञासायां नास्ति प्रतिबंधकत्वमिति भावः

सप्रवृत्तिनिमित्तकत्वोपकानुमानस्येति शेषः

प्रकृतव्यत्वस्य अवसरत्वे देवः

प्रतिबंधकजिज्ञासानिवृत्तौ सत्यामवश्यवक्तव्यत्वमवसरः। वक्तव्यत्वज्ञानादेव जिज्ञासेति तल्लक्षणव्याप्तिः। अत एव ग्रन्थशे
षेऽवसरसङ्गत्यभावसूचनाय प्रासङ्गिकमिति शब्दस्य विरम्य तदिति शब्दस्य वा उपनिबंधः। शब्दान्तरेति। उपमितिविषयीभूतगवय
पदातिरिक्तगोसदृशपदादिशक्तिग्राहकमित्यर्थः। शब्दान्तरसमयग्राहकं केवलमतिदेशवाक्यार्थस्मृतिरूपव्यापारस्मा
वोपधानेनुपक्षीणतूपमितौ। तत्रैसादृश्यादीनामविषयत्वात्। अतः उपमितिविषयीभूतगवयपदप्रवृत्तिनिमित्तत्ववोधक
मनुमानमुपजीव्यत्वेन दर्शयति। सप्रवृत्तीति। समानविभक्तिवेघनया गवयपदप्रवृत्तिनिमित्तत्वविषयकं गवयपदं सप्र
वृत्तिनिमित्तकं साधुपदत्वादित्याकारकमित्यर्थः। गवयो गवयपदप्रवृत्तिनिमित्तवानित्युपमितौ गवयपदं निमित्त
स्य विशेषणतया तद्ग्राहकस्यो[illegible]पजीव्यत्वादिति भावः। इदं च चिंतामणिकारमते। आचार्यमते तु
गवयो गवयपदवाच्य इत्येवोपमितिस्वीकारादतिव्यैयर्थ्यम्। तत्रोपमितावयं क्रमः। अगृहीतगवयपदशक्तिकस्य
गोसदृशो गवयपदवाच्य इति प्रथमानंतरं गोसदृशो गवयपदवाच्य इत्याकारकं अतिदेशवाक्यार्थज्ञानं ततः सादृश्य
विशिष्टपिण्डदर्शनं तदेव करणं ततोऽतिदेशवाक्यार्थस्मृतिः सैव व्यापारः ततो गवयपदवाच्यः इत्युपमितिरिति।
नन्वेतावता उपमितिं प्रत्युपजीव्यत्वमादर्शितं नत्वुपमानस्वरूपं प्रत्यपीत्यत आह। अंततरीति। उपमितिकरणस्या
पि कार्यत्वेनादृष्टजनकप्रवृत्त्यौपयिकानुमानसापेक्षमेवोपमानमित्यर्थः। अयं गवयपदवाच्यः गवयत्वात् गवयसंयो
गात् इत्यनुमानव्यक्तिविशेषस्यापि गवयो गवयपदवाच्य इत्युपमानोपजीवकत्वादाह। निखिलमेवेति। तत्र

गवयो ४ पदे किंचिद्धर्मावच्छिन्नशक्तिमत्त्वेऽपि [illegible] किंचिद्धर्मे गवयपदशक्यतावच्छेदकत्वस्यापरिज्ञानादिति भावः।

निर्द्दिष्टमिव प्रतिज्ञेष्ट कमतत्र

पृ. तिंष्ट

15

ननु कार्यकारणभावस्यामंतराभिधाननियामकत्वे संगतेरेव तन्नियामकत्वं स्यात्तैव्यभिचारोदोषो दुष्पार इत्यत आह · टीकायां एवं चेति · संगतीति कः संगतित्वं इत्यादिः · न दोष इति · तथा च संगतेरनियामकत्वेन

प्रत्यक्षनिरूपणोपजीवकत्वेन निरूपणकं किमिति जिज्ञासेत्यर्थः ५ लृ४

सि॰टी॰प्र॰

नुमानत्वावच्छेदेन चोपजीवकत्वेन दोषः । केचित्तु स्वरसवाही अंबुवादिसंमतत्वादिति मूलेन तादृशसङ्गतेर
प्रदर्शनात्तु यथासंदर्भः । ननु सङ्गतेरनियामकत्वे नेतराभिधानेऽपि नियामकमत आह · संभवति चेति · एवं च
निरूपणयोः कार्यकारणभावः सङ्गतिमुद्रया नो क इति न दोषः । निरूप्ययोरिव निरूपणयोरपि कार्यकारणभा
वोऽपथा कथं चित् जिज्ञासाजननद्वारा सङ्गतिरेवेति केचित् · प्र · प्रत्यक्षानुमानस्येति · निरूपणयोः । प्रत्य
क्षानुमानज्ञानयोः । एवं च प्रत्यक्षपूर्वकत्वेनानुमानज्ञानजनकतार्थं प्रत्यक्षज्ञानस्य प्रथममपेक्षितत्वात् आदौ
प्रत्यक्षमभिहितमिति भावः । निरूपणयोः । ज्ञानजनकशब्दयोः । कार्यकारणभावः । प्रयोज्यप्रयोजकभावः इ
त्यर्थ इति केचित् · अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववत् शेषवत् सामान्यतोदृष्टं चेति सूत्रे अथ प्रत्यक्षल
क्षणानंतरं अनुमानमुच्यते इति शेषः । त्रैविध्यं दर्शयति · पूर्ववदित्यादिना पूर्वं कारणं तल्लिंगकं यथा अं
त्यतंतुसंयोगेन पटोत्पत्त्यनुमानम् · शेषः कार्यम् · तल्लिंगकं यथा नदीऽपरदेशे वृष्टिमानिति विशिष्टप्रवाह
वत्त्वादिति · सामान्यतो कार्यकारणभिन्नलिंगकं यथा इच्छा द्रव्याश्रिता गुणत्वादिति · यद्वा · पूर्ववत् अन्वयिकं शे
षवत् व्यतिरेकी सामान्यतः । सामान्येनान्वयव्यतिरेकसाधारणसहचारेण गृहीतम् · एवं च केवलान्वयिसा
ध्यकं केवलव्यतिरेकि साध्यकं अन्वयव्यतिरेकिसाध्यकमित्यर्थः । अत्र चानुमाने अनुमितिः कारणलिं
गिके सेवं व्याख्येयम् · सूत्रे च तद्यतेर्व्याहृत्य तादृशानुमितिर्यस्मादनुमानमिति कि सानुमितिकरणस्यापि

ना१ ननु व्याप्तिप्रत्यक्षस्यैव अनुमानत्वं व्याप्त्यादिप्रत्यक्षपूर्वकत्वमनुमितेर्लक्षणं संभवति नानुमानलक्षणमत आह २

परिलिंगपरामर्शात्तुमितिः संगतित्वेनेत्यर्थः नो नोक्तदोषइत्याभावः

६९४

श्रीरामायनमः
८

लक्षणंस ध्वंसः फलायोगव्यवच्छिन्नं कारणं करणमिति मते तृतीयलिंगपरामर्शएवानुमानमित्यनुमानपदव
पाख्युत्पत्त्यर्थकमेव न तु यत इति नाध्याहर्तव्यमिति। व्याप्यादिरूपादिना साध्यसाधनतत्सहचारपक्षादिपरिग्रहः। अ
त्र च तत्पूर्वकमिति तत्सदेनेन्द्रियार्थसन्निकर्षोत्पन्नत्वेन प्रत्यक्षस्य इन्द्रियार्थसन्निकर्षोत्पन्नज्ञानमि [illegible] त्वा
दिपूर्वत्वेन प्रयोगो तस्य परामर्शः। तेन स्वरूपनिरूपणयोः फलनिरूपणयोः कार्यकारणभावावगमः। अन्य
था प्रत्यक्षफलनिरूपणानन्तरमिति कारणनिरूपणयोरैक्योपजीव्योपजीवकभावमात्रस्याभावात्। तेनासङ्गतिः
स्यादिति ध्येयम्। नन्वेवमपि सौत्रक्रमोपपादनेऽपि अत्रस क्रमो नोपपादित इत्यत आह। अत्रापीति। अ
त्रापि। अनुमानलक्षणेऽपि। सहचारप्रत्यक्षेति। यद्यपि व्यभिचारज्ञानविरहकृतं सहचारदर्शनं व्याप्तिग्रा
हकमित्युक्तं तत्र च प्रत्यक्षं विशेष्यमिति कथं तन्निरूपणस्य हेतुत्वम्। तथापि प्रत्यक्षं अप्रतिपाद्य प्रत्यक्ष
व्याप्तिग्राहकमिति बोधयितुं परोक्षशब्देनेत्यापि प्रत्यक्षनिरूपणं हेतुरिति बोध्यम्। अत्रापि प्रत्यक्षत्वरू
इन्द्रियत्वेनेन्द्रियजन्यत्वेन प्रत्यक्षमिति लक्षणकरणतत्करणनिरूपणयोः कार्यकारणभावावगमः। तस्य
तेन रूपेणानुमाननिरूपणस्य। अनुमानोपमानयोरपि क्रमे नियामकमाह। एवमिति। अनुमानस्योपमा
नात्पूर्वं तत्त्वमप्रसक्तत्वापाननिराकृतम्। उपमानस्य चानुमानेऽन्तर्गतत्वं प्रसक्तं एकदेशानामनुमाने
नोपमानकार्याण्यथासिद्ध्युपगमात्। अतः उपमानस्वरूपे अनुमानभिन्नत्वेनोपमाननिरूपितमिति तद

प्रत्युक्तं व्याप्तिग्राहकमिति [struck out] प्रत्यक्षविशेष्यत्वाद्बोधेऽपि ५

शि॰ दी॰ भ॰

अनुमानलक्षणेऽपि १ अव्यतिरेक आदावितिशेषः १
आदौकर्तृमतयापाप्ते १

र्थं अनुमानं प्राक् निरूपितमिति भावः ॥ श्री ॥ ननु अनुमानलक्षणे कर्तव्ये अनुमितिः किं इति तल्लक्षणस्य तदिदस्य आह॰ लक्षणरूपेति॰ लक्षणं तत्करणमित्यादिना स्वरूपं तत्त्वेत्यादिना प्रामाण्यं अथानुमानं न प्रमाणमित्यादिना निरूपितम्॰ आदिनानैवानुमानं त्रिविधमिति विभागादिसंग्रहः ॥ एषु सर्वेषु अनुमितेर्विशेषणत्वादिति भावः ॥ प्रामाण्यादिभिरिति॰ तृतीया प्रकारितायां निरूपणं शब्दः ॥ तथा च लक्षणस्वरूपप्रामाण्यादिप्रकारकशाब्दविषये अनुमाने विशेषणत्वेनानुप्रविष्टा इयमनुमितिरित्यर्थः॥ अप्रथमान्तान्वयविरोधः ॥ तथा चाधारसप्तमी स्वविषयक निरूपणप्रकारत्वं संबंधः ॥ प्रकारित्वं विषयित्वं च व्यापारानुबाधितया बोध्यम्॰ अनुमाने निरूपणीयेऽइति॰ सतिसप्तमी अनुमाननिरूपणे कर्तव्ये इत्यर्थ इति कश्चित्॰ अनुमाने निरूपणीये अनुमाननिरूपणार्थम्॰ तथा च निमित्तसप्तमी॰ अनुमानस्य विशेष्यतया निरूपणस्य च विशेषणतया पूर्ववाक्येन बोधितत्वात्॰ तद्धेदेन अनुमाननिरूपणेति परामर्शस्य संभवात्॰ विशेषणस्यैव निमित्ततया विशेष्यनिमित्तस्य विवक्षितत्वात् तयोक्तमित्यन्ये अत्रोभयत्रापि अनुमितिः निरूप्यत इत्यन्वयः ॥ ननु भवतु सर्वत्रानुमितेरनुप्रवेशो अनुमितिघटितमेवानुमानलक्षणं किमिति तत्त्वं अन्यथापि तत्[illegible]णसंभवादत आह॰ करणस्येति॰ अत्र मूर्तिः करणत्वं नाम क्रियाभेदेन भिन्नं भेदो वैजात्यं तथा च प्रत्यक्षादिकरणतातोऽनुमितिकरणताया विभिन्नत्वमेव प्रत्यक्षानुमानयोर्विभिन्नप्रमाणत्वं यत्प्राविशब्दोभयविषयकस्यैकस्य स्मरणस्याभिन्नत्वेऽपि शब्दानुमानत्वेन पृथक्प्रमाणव्यवहारस्तथा च प्रत्यक्षादिप्रमितितो अनुमितेर्वैलक्षण्यज्ञानार्थं अनुमितिलक्षणमिति भावः ॥ अत्र॰ क्रियालक्षणवाक्ये॰ धर्मिधारणे

विशेषणे हि विधिनिषेधौ विशेषणमुपसंक्रामतः सति विशेष्ये बाधे ६
धर्मिज्ञानत्वादिना चिह्न४ निरूपणस्य ६
सद्दृ४

अनुमाननिरूपणान्निरूपणीयेऽनुमानेऽनिरूपणीयेद्रुकनय
फलभेदेन ३

नतु प्रामाण्यादेर्निरूपकत्वहेतुत्वाधाभावेन
प्रामाण्यादिभिरिति
तृतीयोऽनुपपन्नेत्यत
आह॰ ३

श्री रामाय नमः

(18)

नरोति॰ ननु भावप्रत्ययस्य शक्तिः सामानाधिकरण्यत्वेन तत्तत्पदार्थतावच्छेदकद्वयसामानाधिकरण्यत्वेन वा॰ आद्ये॰ नील
त्वोत्पलत्वयोः सामानाधिकरण्यालाभः। तयोः पदार्थतावच्छेदकत्वेन सामानाधिकरण्येऽनन्वयापातेः॰ नचान्त्ये तेन नीलत्वो
त्पलत्वयोरेव लक्षणया गौरवात्॰ नीलत्वोत्पलत्वयोरभेदस्य वाधितत्वात्॰ नीलोत्पलपदात् नीलाभिन्नोत्पलोऽनुभवात्
लापापत्तेश्च। द्वितीये॰ नीलोत्पलीयं नीलत्वोत्पलत्वसामानाधिकरण्यमित्यत्रेवंरीत्या प्रत्ययार्थतादृशसामानाधिकरण्ये
अवच्छेदकतासंबंधेन प्रकृत्यर्थस्य नीलोत्पलस्यान्वयोपपादनेनैकदेशान्वयाभावेऽप्यनेन शक्तिकल्पनापत्तेः एवं
घटत्वादेः प्रकृत्यर्थतावच्छेदकधर्मस्य प्रतिपादने नीलोत्पलत्वमित्यत्र तादृशसामानाधिकरण्यस्य प्रतीत्यनुपपत्तिर्भे
दकस्य नमपीति॰ अत्र वदंति॰ घटत्वमित्यादौ प्रकृतशक्यैकदेशप्रकृत्या तादृशसामानाधिकरण्यलाभः। तत्र हि घटेतरा
वृत्तित्वे सति सकलघटवृत्तित्वेन प्रकारेण घटत्वमुपस्थाप्यते तत्र प्रकृतितत्पदवृत्त्यसाभः। इतरावृत्तित्वादौ
भावप्रत्ययस्य शक्तिः। तत्रापि इतरावृत्तित्वमभावः सा कस्य दत्तिमत्त्वेति विशकलितमर्थः। इतरवृत्तित्वप्रतियोगिका
भावस्यातिप्रसक्तत्वात्॰ इतरवृत्तित्वसामान्यावच्छिन्नाभावस्याप्रसिद्धत्वात्॰ घटत्वादेस्तद्घटितत्वाच्च॰ विशिष्टस्य शक्यता
संभवात्॰ व्युत्पत्तिवैचित्र्याच्च॰ एकपदोपात्तानामपि तावतां परस्परान्वये बोधः। तत्र प्रकृतिजन्यबोधे नसं
बंधेन तत्प्रकृत्यर्थतावच्छेदकधर्मस्य प्रकारतातेन संबंधेन इतरावृत्तित्वं व्याप्तिमत्त्वं चार्थः। तेन घटेतरास्मिन्

न्तः ४

धे २

शि·टी·म·

कालादौ कालिकसंबंधेन घटत्वस्य सत्त्वेपि न क्षतिः। न वा घटत्वमित्यादौ नञर्थे गुणादिमत्त्वादेर्भानप्रसङ्गः नीलो [illegible] सत्त्वमित्यादौ च नीला
भिन्नगुणस्यैव प्रकृत्यर्थः। तत्र प्रकृत्यर्थतावच्छेदकं नीलाभिन्नो सत्त्वं तत्र नीलत्वसमवाय्यभिन्नसमवेतो सत्त्वं तस्य चोपाधितया स्व
रूपसंबंधेनैव प्रकृतिजन्यबोधे प्रकारता। तेन संबंधेन तत्र सत्त्वाभिधाने च सामानाधिकरण्यस्यापि भाने अभेदसम्बन्धाधिकरणस्य भानेपि
नीलत्वसमवायिभिन्नसमवायस्यापि भानादिति। प्रमेयत्वमित्यादौ चेतरावृत्तित्वांशो न भासते अप्रसिद्धत्वात्। किं तु सकलप्रमेयवृत्ति
त्वं न च गुरुत्वान्यत्वविशिष्टत्वमित्यादौ विशिष्टस्यानतिरिक्ततया तदितरासमवेतत्वस्य महत्त्वमित्यादौ च सकलमहद्वृत्ति
त्वस्य महत्त्वारम्भकत्वेन बाधादनन्वयप्रसंग इति वाच्यम्। तादृशेतरत्वव्यापकात्यन्ताभावप्रतियोगितावच्छेदकत्वस्य सत्त्वात्यन्ताभावप्रति
योगितानवच्छेदकधर्मवत्त्वस्यैव तद्वृत्तिमात्रपदेन विवक्षितत्वात्। तदितरव्यापकेति करणाच्च घटत्वमित्यादौ न द्रव्यत्वाभा त्व दे
नमिति। अत्र नव्याः। एवं सति एकत्वमित्यादौ परिमाणादेः कथं न भानं न च प्रकृत्यर्थतावच्छेदकनिरूपितत्वविशिष्ट
संबंधेनैव तदितरावृत्तित्वं तद्वृत्तित्वं च प्रतीयते। तत्र एकत्वनिरूपितसमवायेन परिमाणादिकमवृत्तीति न तत्रैकत्व
पदवाच्यतेति वाच्यम्। एवं सति अनेकतरशक्तिकल्पनावश्यकत्वे घटत्व [illegible] दिप्राप्तिस्तिस्तत्त्वेनैव शक्तिरस्तु लिङ्गत्व
त्वादिगौरवसाहित्यत्वा। यद्धर्मत्वेनैव शक्तिस्तत्प्रकृत्यर्थतावच्छेदकनिरूपितसंबंधेन तत्र प्रकृत्यर्थावय
निन घटत्वमित्यादौ न द्रव्यत्वादेर्बोधः। अत एव गुरुत्वाकिरणावल्यां पृथक्त्वमित्यादौ प्रकृत्यर्थतावच्छेदकाने वयुक्त्या न भ
वप्रत्ययप्राप्तापादयति। प्रतीतिस्तु तद्रूपैकधर्मत्वेनैव संप्रदेनाप्रदीपितत्वानः। विशिष्यवाशकौ चनीलत्वौ सत्त
त्वसामानाधिकरण्यप्रकृतेभावप्रत्ययार्थः नीलो सत्त्वस्य प्रकृत्यर्थस्य सामानाधिकरण्यं वच्छेदकत्वेनान्वयः घटपदत्वमि स्थात्मापनमः १

(20)

मित्यत्र हृदे तु नरस्यैव नीलो सत्त्वमित्यत्र कर्मधारयोत्तरस्यापि भावप्रत्ययस्य सामान्यशब्दोपस्थितयोर्नीलत्वसत्त्वयोः क
र्मधारयोत्तरभावप्रत्ययस्य वह्निरूपविशेषशब्दोपस्थिते सामानाधिकरण्ये विशेषणत्वेनान्वयः। नीलाविन्नो सत्त्वस्य च
प्रकृत्यर्थस्याधेयत्वसंबंधेन नीलत्वे सत्त्वप्रकारकबोधे कत्वसंबंधेन तत्सामानाधिकरण्ये चान्वय इत्यपि केचित्। नाधि
तिन्नाधिकत्वापितानाद्दश सामानाधिकरण्यविषयकेत्यर्थः। भागानुमितीति। भ्रांतेभ्रमः। न च हृदो वह्निमानित्यादौ व्या
प्तिविशिष्टस्य हृदवृत्तित्वसामानाधिकरण्याप्रसिद्ध्या कथं तत्ज्ञानं तत्रेति वाच्यम्। तत्र हृदवृत्तित्वे व्याप्तिविशिष्टस्य
सामानाधिकरण्यावगाहिज्ञानमेव तदुभयसामानाधिकरण्यज्ञानपदार्थ इत्याशयात्। अत एव अनेनैव दोषेणादे
भिरास्करिष्यतीति। केचित्तु पर्वतो वह्निमान् ध्वजी पटत्वादित्यादौ व्याप्तिविशिष्टस्य पर्वतवृत्तित्वसामानाधिकरण्यप्रद
तोकादोप्रसिद्धेस्तत्र ध्वजीपटत्वे आरोपात्। यथार्थानुमितेस्तत्र नाव्याप्तिरित्यर्थः। भागानुमितिः। भ्रांतस्यानुमितिः
भ्रमजन्ययथार्थानुमितीत्यर्थ इत्याहुः। तत्संदर्भविरोधादुपेक्ष्यम्। नियमत इति। यत्र वह्निव्याप्यवान् वह्निव्या
प्तिविशिष्टपर्वतवृत्ति धूमवांश्च पर्वत इत्याकारकः परामर्शः तत्रांतत्वेनैवोपि पत्रवह्निव्याप्यवान् नित्यैवपरामर्श
स्त्वतद्भावादित्यर्थः। ननु तेन रूपेण हेतुत्वग्रहणानयत्रतादृशबोधाभावस्तत्रानुमितिरपेक्षणीये सत्तोपेरेवेत्य
तिन्न तु सामानाधिकरण्यमेकाधिकरणसंबंधः एवं च समरणासंभवात् विशिष्टज्ञानस्य भेदान्यथानुपपत्त्या
विशेषणप्रतियोगिकविशेष्यानुयोगिकसंबंधो विशिष्टधीविषयत्वेनानुपेयः। तथा च वह्निव्याप्यधूमवान्

अनुमितिसूत्रतत्तदंशमादायैवकाचयते ५

शि-टी- म-

पर्वतस्य सत्त्वे भ्रमे वह्निव्याप्तिवैशिष्ट्यानुयोगित्वं पर्वतस्य तत्त्वप्रतियोगित्वं वह्न्यादिसामानाधिकरण्ये भासत एवेत्यत आह · संबंध
संबंधेति · समूहालंबनाद्विशिष्टज्ञानस्य भेदान्यथानुपपत्त्यानुयोगित्वप्रतियोगित्वादिरूपसंबंधज्ञानवत्सामानाधि
करण्यभानमपि भिन्नविषयतीयतः संबंधसंबंधेति कश्चित् · संबंधसंबंधाविषयकत्वेपि समूहालंबनव्यावृत्तस्य विशि
ष्टज्ञानत्वस्योपपादनत्वादित्यर्थः । समूहालंबने सर्वत्र विशेष्यत्वे व विशिष्टज्ञाने विशेषणे प्रकारता संसर्गे
च संबंधता विशेष्ये विशेष्यता रूपा विषयतेति · विषयावैलक्षण्येपि विषयतावैलक्षण्यादेव वैलक्षण्यं विशिष्टज्ञानस्येति
भावः । ननु विषयावैलक्षण्येपि विषयतावैशिष्ट्यात् ज्ञानवैलक्षण्ये जितं साकारवादिना · तथा चार्थे नैव हि धियो विशे
षइत्यनुरोधात् समूहालंबनविषयोनुयोगित्वप्रतियोगित्वविशिष्टधीविषय इत्युपेयमत आह · भ्रमस्य सइति ·
दे वह्निमानिति भ्रमानुमितिस्थले इत्यर्थः । ननु असदेव सामानाधिकरण्यं तत्र प्रसिद्धमत आह · असदिति · अ
सतो वैशिष्ट्यस्य सदुपरागेणापि भानस्य निरासादित्यर्थः । न च प्रतियोग्यप्रसिद्धिः । शुक्तिविशेष्यकत्वावच्छिन्न
रजतत्वप्रकारकत्वस्य रजतत्वप्रकारकत्वसामान्यस्य वा यत्किंचित्प्रमात्वघटकप्रकारतानियामकसंबंधनिरू
पितत्वानियमवत्त्वेनार्थतस्तन्निरासात् · असद्वैशिष्ट्यभाने तु रजतत्वप्रतियोगिकशुक्त्यनुयोगिकवैशिष्ट्य
स्य यत्किंचित्प्रमात्वघटकप्रकारतानियामकत्वाच्छुक्तौ रजतत्वप्रकारतायां तादृशसंबंधनिरूपितत्वाभावे श्रीरामायनमः
न तादृशनियमभंगादिति · ननु पक्षत्वेति वेत्याप्तिविशिष्टत्वसमानाधिकरण्यावगाहिज्ञानमेव व्याप्तिविशि ।।

२५

वत्त्वपक्षत्वदिति समानाधिकरणज्ञानपदप्रतिपाद्यम् । तत्र सामानाधिकरण्येन व्याप्तिविशिष्टत्वपक्षधर्मत्वयोरन्वयबाधे ति
ताहशज्ञानान्वये बाधात् तथा च ताहशज्ञानजन्यत्वं नाव्याप्तमत आह । अवांतरेति । तथा च एतादृशलक्षणं शक्यप्रतिपा
द्यमिति भावः । लक्षणव्याप्तिमुत्त्वा लक्षणवाक्यजन्यशाब्दबोधानुपपत्तिमप्याह । अवांतरेति कश्चित्तु । विषयेति । वि
षयत्वावच्छेदेन । शशसंबंधेति । शशविषाणस्य तुच्छत्वे अर्थलक्षणया शशसंबंधिविषाणेति शाब्दबोधे शशसंबं
धिभेदस्यैव शशसंबंधाभावस्यापि विशेषणत्वेन तस्य अविरोधी इत्यर्थः । प्रमाणप्रस्तावादिति । प्रमाणत्वेन तत्वविवेच्य म३४
त्वतः प्रमाकरणलक्षणस्यैव प्रस्तुतत्वेन तदर्थं प्रमायाः लक्षणस्यैवोचितत्वादित्यर्थः । प्रमेयेति । ननु प्र
माकरणत्वलक्षणेऽनुपयोगिनी भ्रांतिरप्रमेत्यर्थः । उपाध्यायमते पक्षतावच्छेदकसामानाधिकरण्येनैव साध्य
सत्त्वेऽनुमितिविषयः । ननु पक्षतावच्छेदकावच्छेदेनापि अवच्छेदकत्वस्य व्यापकत्वाघटकत्वेन साध्यसंबंध
विधया भानासंभवात् । तथा च गंधप्रागभाववति घटे गंधवान् इत्यनुमितिः प्रमैवे स्यतोपादे चेति । पक्षता
वच्छेदकावच्छेदेन साध्यभानस्यानुभाविकत्वादसंसर्गाग्रहादिसामान्यसामग्रीवशादनुमितावप्यवच्छेद
कत्वं भासत एवेति भावः । प्रथमज्ञानपदस्येतरपरत्वे तत्रैवातिव्याप्तिरिति भावः । प्रमापरमिति । यावत्स्वसामि ६३
न्नत्वं प्रमात्वम् । अव्याप्येति । अव्याप्यव्याप्यत्वावगाहिनी अपक्षधर्मे पक्षधर्मत्वावगाहिनीत्यर्थः । वस्तुतो व
स्तुगत्या साध्यवान् यः पक्षः तदवगाहितया ननु तस्या अनुमितेर्लिंगोपधानांशे भ्रमत्वेनालक्ष्यत्वमत आह ।

शि·टी·म·

वपि२

लिंगोपहितेति प्रमाणाभावादिति शेषः। ननु वस्तुगत्या साध्यवान्यः पक्षः तत्रेश्वरस्य तादृशज्ञानं प्रसिद्धमतस्तज्ज
न्यत्वस्य तद्धेतुमितौ सत्त्वान्नाव्याप्तिरत आह ईश्वरेति· अतिप्रसंजकत्वादिति· तादृशपरामर्शत्वेन तस्य हेतुत्वाभा
वात् उपादानप्रत्यक्षत्वेन तज्जन्यत्वस्य प्रमामात्रे ऽतिप्रसंजकत्वादिति भावः। अत एव तादृशप्रमानुमितावव्याप्तेरे
व· तज्ज्ञानं चेति· व्याप्तिविशिष्टे प्र[illegible]धर्मिताज्ञानमित्येवंरूपः सप्तमीतत्पुरुषोपि भेस्यर्थः। पदार्थे तावदेकैकेति
न चैवं सरूपैकशेषस्य द्वंद्वापवादकत्वानुपपत्तिः एकविषयत्वाभावादिति वाच्यम्· पदजन्यप्रतीतिविशेष्यरूप
स्य पदार्थस्य भेदापेक्षया पदजन्यप्रतीतिविषयभेद एव· द्वंद्वस्य लाघवेन कल्पनात्· एवं च नीलघटयोरित्यत्र
पदजन्यप्रतीतिप्रकारभेदात् तथा घटाइत्यत्र विशेष्यभेदात् द्वंद्वस्य प्रसक्तिः अक्षाइत्यत्र नानार्थ[illegible] एवं वा सरूपैक
शेषस्य सार्थक्यं तथाप्युक्तेपि नानुपपत्तिरिति· ननु नीलघटयोरभेदद्वयात् द्वित्वं कुतोन्वेति· न तादृशेष्येण
स्यैकत्वात्· न विशेषणे तयोः पदार्थतावच्छेदकत्वेन निराकांक्षत्वात्· न च प्रकृत्यर्थवृत्तिसंख्यावाचकत्वसुपां न

न्या४

तु तत्र वृत्तिसंख्याबोधकत्वं अत एवैकस्मिन्नाथो परमाणौ आपद्यत्र न [illegible]णनादापवहुवचनं समर्थितं सर्व
मानोपाध्यायैरिति वाच्यम्· एकस्मिन् घटे एको घट इत्यत्रासाधुत्वज्ञानाभावात् शाब्दाशाब्दबोधप्रसंगात् तत्र
द्विवचनं पदसाधुत्वज्ञापनायैवेति चेत्तर्हि कर्मधारयएवास्तु किमर्थं पदार्थभेदकल्पनामनादृत्य द्वंद्वकल्पन
मिति चेत् नीलघटयोरित्यत्रापि कर्मधारयेनीलाभिन्नघटत्वेनोपस्थितौ अभेदद्वयस्य निराकांक्षितत्वाद

श्रीरामायनमः

तपु४

नन्वयप्रसंगात्. ननु पदार्थयोरभेदस्थलेपि द्वन्द्वस्यासाधुत्वे कर्मधारयः किमर्थमुपयोगी क्रियते इत्यत आह. पदार्थद्वयेति.
तथा च पद्याभेदसंसर्गकबोधे तात्पर्ये तत्र द्वन्द्वस्यासाधुत्वात् कर्मधारयादेव तादृशबोध इति भावः. भेदाभेदोदासीनेति. भेदाभे
दाविषयके त्यर्थः। इदं च पदार्थद्वयबोधविशेषणम्. पदार्थयोरभेदे कर्मधारयस्तत्पदार्थयोर्भेद एव द्वन्द्व इत्यनुशासनं तस्य
रसासिद्धमतमनुसृत्याह. विशिष्टपदस्येति. यत्तु एकस्मिन्नेव चैत्रे चैत्रत्वचैत्रत्वनैतत्संबंधानां पदजन्यप्रतीतिविषयतायां
भेदेन द्वन्द्वापत्तिरतो विशिष्टेति. तदसत्. एकपदे द्वन्द्वस्यानदपवादेकशेषस्य बाधापादयितुमशक्यत्वात्. किंच समस्य
मानपदार्थयोर्विशेष्ययोर्विशेषणयोर्वाभेदस्यापादृष्टापवादकोन सत्पदार्थयोरपि विशेष्यविशेषणयोर्भेद इति मा
यं पंथाः। धर्मपरतयेति. नपुंसके भावे क्तस्यानुशासनात् व्याप्तिवैशिष्ट्यमेव व्याप्तिविशिष्टपदार्थः। तथा च व्याप्तिविशिष्टपक्षधर्म
तापदयोर्द्वन्द्व इति भावः। एतेन वैशिष्ट्यशब्दस्य प्रत्ययस्याश्रयोपस्थापकस्याश्रयत्वे लक्षणायां व्याप्तिवैशिष्ट्याश्रयत्वस्यो
पस्थितौ व्याप्तिवैशिष्ट्याश्रयत्वपक्षधर्मत्वज्ञानजन्यत्वमर्थः स्यात्. तथा च व्याप्यवानिति परामर्शस्य संबंधसंब
धाविषयकत्वात् सैवाव्याप्तिरिति परास्तम्. एवमपि. एकत्र धर्मिणीति विशेषणेपि. मीमांसकेति. तथा च व्याप्यवा
न्निविशेष्यकपरामर्शीयानुमितित्वव्याप्तिः। धर्मावच्छिन्नव्याप्तिवैशिष्ट्यज्ञानत्वेन च कारणमिति कारणतावच्छेदकस्य
नागौरवम्. न च मानाभावाद्व्याप्यवद्वृत्तिकधर्मिताज्ञानत्वेन हेतुत्वे कौचन कालीनत्वं न तु गुरुत्वं यत्प्रवेशादनंतकार्य
कारणभावापत्तिरिति. मिथ इति. ननुभयम्. व्याप्तिविशिष्टत्वपक्षधर्मत्वोभयम्. उपश्लेषः। परस्परसामानाधिकर

स्थलीः २   प्रकारकपक्षधर्म २   सा ३   धर्मत्वावच्छिन्नपक्षधर्मताज्ञानत्वेन ३

प्रसेक ६

५२

शि·दी·म·

६८ क४ क१

रूपम्· अव्यापकत्वात्· व्याप्यवानिति परामर्शे तदसंभवादित्यर्थः। न च वह्निमयेति· ननु मयविषयत्वं नियतधर्मः परामर्शत्वं परा
मर्शप्रत्यक्षे परामर्शत्वेन हेतुतायामानाभावादित्याशयः। न च तत्प्रत्यक्षत्वेन हेतुत्वात् वह्निव्याप्यधूमोऽयं पर्वत इत्यादितो
प्रसक्तेऽतिव्याप्तिरेवेति वाच्यम्· अनेकवृत्तित्वेन धर्मस्य विशेषणत्वात् तद्घटितत्वस्य चैकमात्रवृत्तित्वात्· विषयस्य तत्त्वेन कारण
त्वेनास्तीत्याशयेनेदमिति कश्चित्· पक्षधर्मतेति· पक्षधर्मताविषयत्वं नियतधर्मावच्छिन्नेत्युक्तौ च पक्षधर्मतायाः पर्वतसंयो
गादिरूपतया धूमधूमाभावसहचरितवह्निमान् पर्वत इत्येवमाकारकज्ञानत्वावच्छिन्नजनकतानिरूपितजन्यताश्रयपर्वतो धू
मवान्न वेति संशयेऽतिव्याप्तिः स्यात् अतस्तद्वारणाय व्याप्तिविषयकत्वमावश्यकम्· न चैवमपि धूमव्याप्यधूमव्याप्या
वसहचरितवह्निमानित्येवंरूपसाधारणधर्मवद्धर्मिज्ञानजन्ये पर्वतो धूमव्याप्यवान्नवेति संशयेऽतिव्याप्तिरिति वा
च्यम्· पक्षधर्मताविषयकत्वदलेनापि तद्वारणात्· तथा च व्याप्तिविषयकत्वदलस्य संशयविशेषेऽतिव्याप्तिवारकता
या व्यावर्तकत्वमस्ति ननु पक्षधर्मतापदस्य स्वाशयात्· धूमवत्पर्वतसंयोगप्रत्यक्षे संबंधितावच्छेदकधूमप्रकारकपर्व
तज्ञानत्वेन हेतुत्वात् तत्रातिव्याप्तिरतः पक्षधर्मतापदोपादानवैयर्थ्यमुक्तमिति कश्चित्· व्याप्तिज्ञानत्वं परामर्शता
वच्छिन्नकारणताद्वयपर्याप्त्याभाव व्याप्तिविषयत्वस्यानियतत्वे विकाशकतयोक्तमित्यन्ये· वस्तुतस्तु पक्षधर्मताविषय
त्वनियतत्वेऽस्तु पायतने धूमवान् पर्वतो नास्तीत्यभावेनोक्तप्रत्यक्षे प्रतियोगितावच्छेदकधूमप्रकारकपर्वतज्ञानजन्येऽतिव्या
प्तिरतो व्याप्तिविषयकत्वमावश्यकम्· न च तथापि वह्निव्याप्यो नास्तीत्यभावप्रत्यक्षेऽतिव्याप्तिरिति वाच्यम्· निष्कृष्टमते

श्रीरामायनमः

त२ क३

तथा १

मात्रे रतीन्द्रियत्वयावत्त्वावच्छिन्नप्रतियोगिताकाभावस्याप्यतीन्द्रियत्वात् तत्र नैतेन रूपेण हेतुता· अभावलौकिकप्रत्यक्षं प्रत्येव हेतु
त्वात्· एवं व्याप्तिपदस्याभावमात्रपरत्वेऽभावप्रकारकत्वनियतधर्मावच्छिन्नकारणताप्रतियोगिककार्यताशालि सविव
क्षणे अनुमितिमात्रे सत्त्वरूपयाति· परंतु स्थले विशेषेऽतिव्याप्तिर्भवति· पक्षधर्मतापदोपादाने तु व्याप्तिरतिव्याप्तिश्चे
त्सतोऽपि पक्षधर्मतोपादानवैयर्थ्यमुक्तमिति ध्येयम्· वस्तुतस्तु· विशिष्टवैशिष्ट्यबोधानवतिव्याप्तिप्रकारकस्याप्यव्याप्यविषयक
त्वेन जन्ये ज्ञाने विशेषणत्वाभिमतिर्नश्यति· तथा च पक्षधर्मताविषयकत्वनियते साध्यविवक्षणे धूमवत् पर्वतवानिति
विशिष्टवैशिष्ट्यबोधे व्याप्तिविषयकेऽतिव्याप्तिः अतो व्याप्तिविषयके साध्यविवक्षणमावश्यकम्· तथा च पक्षधर्मितोपादानवैयर्थ्य
(नैव नश्यमस्त्व ध)मितापदमुपादाय तत्र पक्षधर्मताविषयकत्वेनैव जन्यज्ञानविशेष्यताम्· तावतापि विशिष्टवैशिष्ट्यबोधकत्वतिव्या
प्तिवारणसंभवादिति वाच्यम्· तथा सत्त्वसंभवापत्तेः। पर्वतो वह्निमानित्यनुमितेरपि वह्निनिष्ठपक्षधर्मतावि
षयकत्वात् हेतुतावच्छेदकरूपेण पक्षधर्मताविषयत्वे कौ च वह्निव्याप्यवत् पर्वतवानिति विशिष्टवैशिष्ट्यबोधेऽति
व्याप्तिः· व्याप्तिप्रकारकपक्षधर्मताविषयत्वे कौ च व्याप्तिविषयके सत्त्वेन लघुत्वेनाविवक्षणेऽपि साध्यादितिनुसा
रम्· व्याप्तिविशिष्टपदपक्षधर्मताज्ञानपदयोः कर्मधारयः। विशिष्टपदं च प्रकारकपरमित्याशयेनाह· व्याप्तौ ति·
यद्यपि वह्निव्याप्यो धूमो द्रव्यवान् पर्वत इति ज्ञानस्यापि व्याप्तिप्रकारकत्वात्· पक्षधर्मताज्ञानत्वात् तज्जन्यानुम

शि.टी.भ.

एकरूपेण ।

नमा येऽनिव्याप्तिः । एकेन रूपेण अनकत्वे कोचा संभवश्च वह्निव्याप्यो धूमो धूमवान् पर्वत इति ज्ञानस्साधारण्यात् । त
थापि पक्षधर्मताशे व्याप्तिप्रकारक संविवक्षितं तत्र पक्षविशेष्यतानिरूपितप्रकारतावच्छिन्नव्याप्तिप्रकारताकत्वं
धूमो वह्निव्याप्यो धूमवान् पर्वत इत्यत्र पर्वतविशेष्यतानिरूपिता धूमनिष्ठप्रकारता न व्याप्तिप्रकारतावच्छिन्ना
किंतु धूमस्यमुख्यविशेष्यतेवेति न तत्साधारण्यमिति ध्येयम् । अत्रापि । तादृशविवक्षणेपि । वह्निव्याप्यधूमवा
न यमित्युक्तौ वह्निमदन्यावृत्तित्वरूपव्याप्तिप्रकारकत्वासंभवं वास्यादतो विशिष्याह । इंधनसमानाधिकरणे
ति । भ्रमानुमितेरिति । पूर्वं भ्रमात्मकपरामर्शजन्यायोविषयाबाधेन प्रमानुमितावेवाव्याप्तिर्दर्शितेति भावः । वृत्ति
नियामकसंयोगेन साध्यतायां हेतुतायां वा काशानुमितिः परामर्शश्च प्रमैव स्यादतो वृत्तिनियामकसंयोगेनसं
नियामकसंयोगेन साध्यतायां हेतुतायां वा काशानुमितिः परामर्शश्च प्रमैव स्यादतो वृत्तिनियामकसंयोगेन सं
बंधेन हेतुतासाध्यताप्रतिपत्त्यर्थमाह । अत्रेति । सप्तम्या आधेयत्वप्रतिपादनात् । नितरामिति । साध्यव्यापकत्व
प्रकारकेसाधने च साध्यसामानाधिकरण्यप्रकारकमिसेवं व्याप्तिप्रकारकत्वोक्तौ पूर्वोक्ताव्याप्तिनिरासः स्यात् । अत्र
तुव्यापकत्वसामानाधिकरण्ययोरुभयोरपि अप्रसिध्या अव्याप्तिवारणं न संभवतीति भावः । तथा । अव्याप्तिः ।
तावत्पदार्थानाम् । व्याप्तिशरीरे विशेषणतो पृथगर्थानाम् । तथाविधेति । व्याप्तिभाने यत्रयत्स्य येनसंबंधेन प्र
करतात्रतेन संबंधेन न प्रकारत्वमित्यर्थः । तत्रापि करणे हेतुप्रकारके अभावे तादृशाधिकरणवृत्तित्व
प्रकारकं प्रतियोगितायां तादृशाभावप्रकारकमित्यादिक्रमेण बोध्यम् । न च व्यतिरेकिण्यतिः । तत्र पक्षधर्म

नि३

श्रीरामायनमः

१८

मितांशे वह्न्यभावव्यापकाभावप्रतियोगिधूमत्वस्यैव प्रकारत्वादिति भावः। ननु धूमव्यापकवह्निसमानाधिकरणधूमत्वस्य वह्न्यभावव्यापकाभाव
प्रतियोगिधूमत्वस्य च ज्ञानेन वह्न्यभाववद्वृत्तित्वरूपव्यभिचारधीं प्रति ग्राह्याभावानवगाहितया न विरोधीत्यत आह। भवति हीति। तथा
चातथाभूतस्यापि अनायत्यैव मणिमंत्रादिन्यायेन प्रतिबंधकत्वं कल्प्यत इति भावः। ननु धूमव्यापकवह्निसमानाधिकरणधूमसमानाधि
करणत्वरासभवान्निति ज्ञानेन धूमसमानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकवह्नित्ववान्निति ज्ञानेन च वह्न्यभाववद्वृत्तिधूम इति व्य
भिचारधीविरोधित्वं समत्वात्तज्जन्यप्रत्यक्षे इति व्याप्तिः। उक्तरूपस्य जनकत्वाविवक्षणे त्वसंभव एव। उक्तरूपस्य तादृशधूमसमानाधि
करणत्वरासभवान्निति ज्ञानसाधारण्येन तया जनकतावच्छेदकत्वादत आह। तथाविधेति। न तथा। न पक्षधर्मितांशे व्यभिचारधीविरोधि
धीविषयः रासभादाविति। तथा च तद्विशिष्टव्यभिचारधीविरोधिधीविषयधर्मप्रकारकतद्विशिष्टवत्पक्षधर्मिताज्ञानजन्यत्वम
र्थः। उक्तज्ञाने तु पक्षधर्मितया ज्ञाते रासभत्वविशिष्टे न व्यभिचारधीविरोधि। धूमत्वविशिष्टतया तेपि तस्य न पक्षधर्मितया भान
मिति भावः। ननु धूमसमानाधिकरणेत्यादिव्याप्तेरेवोक्तरूपव्यभिचारधीविरोधित्वे मानाभावः। कथं व्यतिरेकव्याप्तौ। न च व
ह्नित्वं धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकं धूमाभावत्वं वह्न्यभावसमानाधिकरणाभावप्रतियोगितावच्छेदकमित्येवं सम्भूतं
वनात्मकव्यभिचारधीविरोधिधीत्वं वाच्यम्। तथापि धूमव्यापकवह्निकोऽसौ न धूमवान्पर्वत इति ज्ञानस्य सामानाधिकरण्याविषयकतया
नुमित्यजनकस्य संग्राहकतया उक्तरूपस्यानुमितिजनकतानवच्छेदकत्वात्। न च धूमव्यापकवह्निसमानाधिकरणधूमवान्पर्वत
त्वभावव्याप्यताभावप्रतियोगिधूमवान् [illegible] पर्वत इति ज्ञानयोरन्यतरत्वेन हेतुतावच्छेदकमतस्तद्भेदेन लक्षणे निवेश्यमिति
वाच्यम्। अन्यतरत्वघटकभेदानां विशेषणविशेष्यभावे विनिगमनाविरहेण नानाकार्यकारणभावावश्यकत्वेन तदपेक्षया सा

२१

व्यसाधिकरणलक्षणध्वंसानधिकरणत्वेसति स्वाधिकरणलक्षणध्वंसाधिकरणत्वं वा हेतोः स्वरूपं ४

घटानां प्रत्येकरूपेणैव हेतुत्वं तस्मान्नाव्याप्यत्वादत आह॰ व्यतिरेकसहचारेणेति॰ ननु भ्रमस्येव संवादित्वापेक्षया विरोधित्वे मानाभावः तत्काचित्के
न्वयव्यतिरेकानुविधानस्य तादृशव्यभिचारघुन्मायकत्वेनाप्युपयोगादित्यस्वरसादाह॰ व्यतिरेकसहचारेणेति केचित्॰ भ्रमसंशयो
रिति॰ भ्रमसंशयोर्विपरीतज्ञानत्वेनानुगमः॥ विपरीतं च व्यावर्त्तकमाद्यं तेन स्थाणुत्वभ्रमो नरस्यैव पुरुषत्वप्रत्यक्षस्य नासंभवः १
न्दुमरप्रत्यक्षत्वं चाव्यवहितोत्तरत्वसंबंधेन तादृशविपरीतज्ञानवत्प्रत्यक्षान्यत्वं च तेनाव्यवहितोत्तरत्वस्य तत्र द्रष्टा किं विश्रां
तत्वेऽपि न क्षतिः॥ न चान्तत्संशयोत्तरसंशये व्यभिचार इति वाच्यं पक्षमतेन लिङ्गरूपप्रतितत्प्रकारकज्ञानत्वेन विरोधिता
न च प्रामाण्यग्रहणाविषयस्यैव विशेषदर्शनादेरप्यन्वयव्यतिरेकाभ्याम्॰ एवं व्यञ्जकासमवधाने कास्ती नांधकारकाली नैतत्संशयोत्तर
रणे व्यंजकसमवधाने आलोकसमवधाने प्यनेनैव व्यभिचार॰ न चैवं पर्वतो वह्निमानन्नवेति संशयानन्तरं वह्निव्याप्यधूमवान्
पर्वत इत्यादिवह्न्यनुमितिरप्रमा चेत्तत्सन्तां तेन तारतम्य अपेक्षाबुद्ध्यात्मकभ्रमात्मकसपरामर्शः॥ ततः पर्वतो वह्निमानिति अनु
मितिः ततः पर्वतो वह्न्यभाववानिति तेनैव लिङ्गप्रत्यक्षं तत्रापेक्षाबुद्ध्यात्मकपरामर्शेन पुनरनुमित्यापत्तिः एवमंधकारस्य
घटसंशयानन्तरमेव आलोकसमवधाने घटनिर्णयानन्तरं घटे विशेषदर्शने घटनिश्चयापत्तिः॥ प्रत्येकस्यालोक
समवधानस्य सत्त्वादिति वाच्यम्॰ तत्तदालोकाद्यवच्छिन्नविशेषदर्शनाद्यभावविशिष्टतद्विपरीतज्ञानाद्यभावत्वेन तन्नि
श्चयत्वावच्छिन्नं प्रति हेतुत्वादिति॰ बाधनिश्चयस्य स्वाविरोधितायां तु विशेषदर्शनेतत्तदालोकावच्छिन्नत्वे देयम्॰ नो १
स्वमते च संशयोत्तरप्रत्यक्षत्वावच्छिन्नं प्रति विशेषदर्शनस्य न हेतुता अंधकारस्य घटसंशयोत्तरप्रत्यक्षे व्यभिचारात्॰ न च
तादृशविपरीतज्ञानविरोधित्वेन हेतुता॰ विशेषदर्शनालोकादिसाधारणस्य विरोधित्वस्यैकस्याभावात्॰ किं च विशेषादर्शी

पुनर्विशेषादर्शनप्रयुक्तघटसंशयानन्तरं ४

श्रीरामायनमः

नत्पुरुषसंशयानंतरं आलोकसमवधानस्य तत्पुरुषांतरीयांधकारस्थ घटविरोधिनः सत्त्वात् तत्प्रत्यक्षापत्तेः। तत्पुरुषीयतादृशविपरीतज्ञानोत्तर
प्रत्यक्षत्वावच्छिन्नं प्रति तत्पुरुषीयतादृशविपरीतज्ञानविरोधित्वेन हेतुत्वस्योक्तौ च अतीव गौरवम्। पुरुषांतरीयविशेषदर्शनस्यापि तादृश
विरोधित्वे स्वरूपयोग्यत्वादतिप्रसंगः। एवं तादृशविपरीतज्ञानवत्प्रत्यक्षनिर्णयत्वेन कार्यतावच्छेदकं आर्थसमाजग्रस्तत्वात्। किं च
भ्रमसंशयानुत्तरनिर्णयसामान्यसामग्रीसत्त्वे भ्रमसंशयोत्तरमपि सामान्यनिर्णयं दुर्वारमेवेति तदुत्तरप्रत्यक्षेपि सामग्र्यंतरक
ल्पने अतिगौरवं मानाभावाच्च। एवं च विशेषदर्शनं इतरकोटिज्ञानाविरोधितया संशयोत्तरतादृशप्रत्यक्षेऽप्युपयुज्यत इत्यभिसं
धायाह। हेतुतामत इति। न च सर्वमत एव विशेषदर्शनस्य विशेषणधीत्वेन हेतुत्वात् हेतुतामत इति निष्फलम्। विशेषदर्शनत्वेनै
व तस्य हेतुतया परामर्शत्वेन विवक्षणेऽपि तत्रातिव्याप्तिरिति पूर्वपक्षिनिरासाशयात्। विशेषणधियोः हेतुत्वाभिप्रायेणैवे
दर्भितत्कभिन्नः। तथाविधेति। व्याप्तिप्रकारकपक्षधर्मतानिश्चयत्वेनेत्यर्थः। भ्रमादीति। अन्यथा व्यावर्तकधर्मदर्श
नव्यंजकदर्शनालोकादिसाधारण्याभावेन व्यभिचारप्रसंगादिति। भ्रमेत्यस्य व्याप्यशंखत्ववानयमिति दर्शनं च न पीतत्व
भ्रमाविरोधीति न तत्रः भ्रमेत्यस्य प्रत्यक्षम्। केचित्तु विशेषदर्शनाघात इति तथापि तत्कारणकालीनतादृशसंशयोत्तरप्रत्यक्ष
प्रति तादृशाविरोधिदर्शनत्वेन व्यावर्तकधर्मदर्शनादिसाधारणरूपेण हेतुता आलोकाभावप्रयुक्तसंशयोत्तरप्रत्यक्षे
वालोकसमवधानं हेतुरित्याहुः। अत एव तथाविधनिश्चयत्वेन हेतुत्वविवक्षणादेव। लिंगवत्त्वादिलक्षणस्वरूपय
स्य एवंभूतो योऽतिदेशवाक्यार्थः। तस्य ज्ञानेनैव वह्निव्याप्यधूमवत्सर्वं तत्सदृशं महानसपदवाच्यमित्याकारकेण ज्ञानेनान्या
पामित्यर्थः। तथाविधेति। वह्निव्याप्यधूमवत्सर्वं तत्सादृश्यविशिष्टं महानसपदवाच्यत्वज्ञानत्वेनेत्यर्थः। न्यायार्थेति।

विशेषदर्शनस्य विपरीतज्ञानविरोधित्वेन हेतुत्वे गुरुत्वम् तर माह६

धूमज्ञानप्रयवह्निमत्पर्वताभिन्नधूमव्यापकवह्निमदभिन्नधूमवदभि
न्नोवह्निव्याप्यधूमसंबंधीपर्वतोवह्निव्याप्यधूमज्ञानज्ञाप्यवह्निसंबं
धीत्याकारकोबोधः १

५२ वह्निव्याप्यधूमप्रकारकोयम् ३

सि॰ ग्रंथ॰

पंचावयवैरेकवाक्यतया बोधोजन्यत इति चिंतामणिकाराशयस्तु क्रमम्॰ स्यमेहेतुरुपन्यायार्थविशेष्यकनिगमनार्थविशेषणकशाब्दबोधे उ
तिव्याप्तिर्बोध्या॰ ननु उपनये वह्निव्याप्यधूमस्य पर्वतेसाक्षात्प्रकारतया नमानेर्हिंतुमत्वर्भसंबंधिनोऽभेदसंबंधेनप्रकारतयाभानमिति
तादृशनिश्चयत्वेनहेतुत्वविवक्षयैव तत्र नातिव्याप्तिः। तथा चापमितुपनयोः सिद्ध एवेत्यत आह॰ तद्देनेति॰ यत्र वह्निव्याप्यधूम
वान्पर्वतइत्येवं बुद्धिस्थीकृत्य सोऽसौ तिशब्दोऽभिहितस्तत्रवह्निव्याप्यधूमवत्पर्वतोपस्थित्याजन्ये वह्निव्याप्यधूमवान्पर्वतोऽसौ
तिशाब्दबोधेऽतिव्याप्तिः। ननु तद्धदात्त्वबुद्धिस्थत्वेनेवोपस्थितिः शाब्दबोधश्च विशेषधर्मप्रकारकधीश्चमानमेनेति
नेतत्रातिप्रसंगइत्यत आह॰ संकेतेनेति॰ यत्र वह्निव्याप्यधूमवत्पर्वते एव घटपदस्य संकेतग्रहस्तत्र घटोऽसाविति वाक्येन
वह्निव्याप्यधूमवान्पर्वतोऽसाविति शाब्दबोधोजनितस्तत्रातिव्याप्तिरित्यर्थः। ननु महावाक्यार्थज्ञानेनावांतरवाक्यार्थ
ज्ञानं जन्यमतः कथं न्यायार्थज्ञानेनातिव्याप्तिरत आह॰ प्रसादयिष्यतइति॰ पदजन्यत्वस्येति॰ घटादिपदादाश्रयत्वादि
संबंधेनाकाशोपस्थितावपि शाब्दबोधानुदयात्स्वपदजन्यपदार्थोपस्थितित्वेनैव हेतुत्वमित्यर्थः। ननु घटशाब्दबोध
प्रतिवृत्त्या घटोपस्थापकपदज्ञानत्वेनकारणतात् स्वजन्यघटोपस्थितिर्व्यापारः। व्यापारस्य हेतुता च घटत्वप्रकारक
ज्ञानत्वेनैवावच्छिद्यते॰ न चैवं प्रत्यक्षोपस्थितेघटोपस्थितिव्यापारकेघटपदज्ञानेसतिघटशाब्दबोधापत्तिः। घ
टशाब्दबोधेघटोपस्थितेस्तदजनकत्वेनाव्यापारत्वात्॰ नचैवमपिघटपदजन्यघटोपस्थितौमत्सौप्रकारांतरेणघटोपस्थि
तेरपिशाब्दबोधजनकत्वापत्तिरिति वाच्यम्॰ पदजन्यपदार्थोपस्थित्यभावकालेशाब्दबोधानुदयस्यतावतापुपपत्ते
र्ति। अत्र स्वजन्योपस्थितिमात्रंविवक्षितंघटनिवेशस्तुस्फुटत्वार्थतेनेनचेवं २
विशिष्य निवेशनशंकापानानुपपत्तिः ४

श्रीरामायनमः

घटत्वादिविशेषध
र्मप्रकारकत्व पर्यन्त
पदं तेरहस्य

त्वात् । तथा च पदार्थोपस्थितेर्हेतुतायां पदजन्यत्वाप्रवेशात् तथैवातिव्याप्तिरित्यत आह । निश्चयत्वस्येति । शाब्दे निश्चयत्वाप
दज्ञानस्य पदजन्यपदार्थोपस्थितेरव्याप्यत्वेन तस्यास्य लक्षणघटकतया शाब्दबोधस्वरूपतया निश्चयपभिन्नत्वासंभवे
न तद्धारणमसंशयान्यज्ञानत्वस्य प्रवेशानर्थक्यादिति भावः । केचित्तु पदार्थोपस्थितिकारणतायां पदजन्यत्वम
धिकं निर्विशेषं निश्चयत्वं वा निविष्टमित्यतिव्याप्तेरसंभवप्रदर्शनार्थमिदमित्याहुः । तथापि पदार्थोपस्थिति
कारणतामात्रापातिव्याप्तिवारणेऽपि । तादृशप्रसक्ते । वह्निव्याप्यधूमवान् पर्वत इति प्रसक्ते इत्यर्थः । शाब्दबोधस्यापि
वह्निव्याप्यधूमवत्पर्वतं पुरुष इत्यादि रूपतत्त्वानिति शब्दप्रयोगे वह्निव्याप्यधूमविशिष्टपर्वतस्य तद्धर्मार्थतया तादृशवि
शिष्टवैशिष्ट्यधर्मासंभवादित्यर्थः । तादृशविशिष्टवैशिष्ट्यावगाहिशाब्दबोधे पदजन्यविशेषणतावच्छेदकप्रकारक
धियो विशिष्टहेतुत्वात्कल्पनेऽपि तद्विशिष्टवैशिष्ट्यबोधस्यावच्छिन्नप्रतीति तादृशविशेषणतावच्छेदकप्रकारकनिश्चयत्वेन हेतुताप्र
त्यक्षादिसाधारणी तामादाय शाब्दबोधेऽप्यतिव्याप्तिरिति भावः । चकारादिह व्याप्यवत्सर्वतामिन्नः [illegible] पर्वतपदवाच्य इत्युपमि
तिसंग्रहः । ननु तत्कारणतायां निश्चयत्वमनिविष्टमत आह । रक्तो दण्डो न वेति । रक्तदण्डवानिति ज्ञानं द्वेधा । विशेष्ये विशे
षणं तत्र च विशेषणान्तरमिति रीत्या अन्यद्विशिष्टस्य वैशिष्ट्यमिति रीत्या । तत्राद्यं पुरुषनिरूपितदण्डनिष्ठविशेषणतानि
रूपितरक्तत्वनिष्ठविशेषणताशालिनिरूपितत्वविशेषणतापास्वरूपसंबंधविशेषः प्रतीतिसाक्षिकः दण्डो रक्तो दण्डवा
निति द्वितीये च पुरुषनिरूपितदण्डनिष्ठविशेषणतानिरूपितानरक्तत्वनिष्ठविशेषणतेति तत्र [illegible] । कारणं च पावादृश
बणज्ञानमसंसर्गाग्रहस्त्व । अत एव निर्विकल्पकानंतरं दण्डो रक्तो नवेति संशयानन्तरं च न तादृशधीः सार्वलौकिकी । पाद
[illegible] विशेष्ये विशेषणमिति रीत्या बोधाभावे विवादादाह ।

शि०टी०म०

च तादृशसंशयकाले विशेष्ये विशेषणमिति रीत्यापि स्फुरद्रूपत्वानिर्वाहः तदा तादृशबोधं प्रति रक्तो दण्ड इति निश्चयाभावविशिष्टस्य ता-
दृशसंशयस्य प्रतिबन्धकत्वाभ्युपगमः नचैवं रक्तो दण्ड न वेति संशयानन्तरं इह भूतले रक्तो दण्डो नास्तीति मानसधीः विशिष्टे विशेषणमिति री-
त्या स्यात् अभावप्रतियोगितावच्छेदके विशिष्टप्रतियोगिनो विशेष्ये विशेषणमिति रीत्या भानस्याप्रसिद्धत्वेन तद्धि-
न्नप्रतिप्रतिबन्धकत्वकल्पनायाः अयोगादिति वाच्यम्। लौकिकप्रत्यक्षे इन्द्रियसंबद्धविशेषणतया इव अभावे रक्तो द-
ण्डीयत्वासंसर्गस्यापि अभावे रक्तत्वविशिष्टदण्डत्वविशिष्टवैशिष्ट्यावगाहिबोधत्वस्यैव कार्यतावच्छेदकत्वे तथा-
तादृशबोधवारणात्। वस्तुतस्तु अभावनिरूपितदण्डनिष्ठविशेषणतानिरूपितरक्त[illegible]निष्ठविशेषणताशा-
लित्वमेव विशेष्ये विशेषणमिति रीत्यात्मकत्वं ग्राह्यत्वम्। न चैवं रक्तो दण्डो नास्तीति विशिष्टवैशिष्ट्यबोधे प्रसिद्धसं-
गत्वाद्युन्नेप्रति तादृशनिश्चयाभावविशिष्टसंशयस्यैव प्रतिबन्धकत्वात्। संशयानन्तरं निश्चये न तादृशविशि-
ष्टवैशिष्ट्यबोधानुपपत्तिः अत एव विशेष्ये विशेषणमिति रीत्या विषयत्वेन विशिष्टवैशिष्ट्यबोधसाधारण्ये
प्रत्यक्षादिजनकतावच्छेदका। न च प्रत्यक्षादिनियामिका एका विषयता तद्व्याप्यं च विशेष्ये विशेषणमिति [illegible]
विशिष्टस्य वैशिष्ट्यमिति विषयताद्वयमिति वाच्यम्। मानाभावात्। विशिष्टवैशिष्ट्यबोधेऽपि विशेष्ये विशेष-
